


# Arsha Vidya Gurukulam

## Two-Week Bhāṣyam Retreat 2026

**Tuesday July 7 at 8 PM**

**Tuesday July 21st at 11:30 AM**

**Topic 1**

**Mundaka Upanishad with Bhāṣyam**

Swami Sakshatkrutananda Saraswatiji

**Topic 2**

**Kenopanishad with Bhāṣyam**

Swami Muktatmananda Saraswatiji

**Arsha Vidya Gurukulam**

**651, Route 115 Saylorsburg, PA-18353**

**www.arshavidya.org**

**admin@arshavidyagurukulam.org Contact: 570- 992 - 2339**

# Two-Week Bhāṣyam July 7 – 21 (Tue – Tue) Schedule

**Venue: Swami Dayananda Vijñāna Bhavana**

**Tuesday, July 7**

8:00-9:00 pm - Orientation and Introductory Satsang by Swami Sakshatkrutananda Saraswatiji (Virtual)

**Wednesday, July 8 to Monday, July 20**

7:00 – 7:30am: Guided Meditation by Swami Jnananda Saraswatiji

9:00 – 10:00am *Mundaka Upanishad with Bhāṣyam* by Swami Sakshatkrutananda Saraswatiji (Hybrid)

11:00 – 12:00pm *Kenopanishad with Bhāṣyam* by Swami Muktatmananda Saraswatiji

5:00 – 6:00pm *Kenopanishad with Bhāṣyam* by Swami Muktatmananda Saraswatiji

8:00 - 9:00 pm: Satsang (Q&A) by Swami Sakshatkrutananda Saraswatiji & Swami Muktatmananda Saraswatiji (Alternate Day)

**Tuesday, July 21 – Retreat Concluding Day**

7:00 – 7:30am: Guided Meditation by Swami Jnananda Saraswatiji

9:00 - 10:00am: *Kenopanishad with Bhāṣyam* by Swami Muktatmananda Saraswatiji

10:30-11:30am *Mundaka Upanishad with Bhāṣyam* by Swami Sakshatkrutananda Saraswatiji followed by Guru Daksina

# मुण्डकोपनिषत्

mundaka bhashyam

भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु। ओं शान्तिः शान्तिः शान्तिः।

### ब्रह्मविद्यास्तुतिः

ओम् "ब्रह्मा देवानाम्" इत्याद्याथर्वणोपनिषत्[1]। अस्याश्च विद्यासम्प्रदायकर्तृपारम्पर्यलक्षणसम्बन्धमादावेवाह स्वयमेव स्तुत्यर्थम्। एवं हि महद्भिः परमपुरुषार्थसाधनत्वेन गुरुणाऽऽयासेन लब्धा विद्येति श्रोतृबुद्धिप्ररोचनाय विद्यां महीकरोति। स्तुत्या प्ररोचितायां हि विद्यायां सादराः प्रवर्त्तेरन्निति।

### ब्रह्मविद्यायाः अनुबन्धचतुष्टयनिरूपणम्

प्रयोजनेन तु विद्यायाः साध्यसाधनलक्षणसम्बन्धमुत्तरत्र वक्ष्यति "भिद्यते हृदयग्रन्थिः" (२.२.८) इत्यादिना। अत्र च अपरशब्दवाच्यायाम् ऋग्वेदादिलक्षणायां विधिप्रतिषेधमात्रपरायां विद्यायां संसारकारणाविद्यादिदोषनिवर्त्तकत्वं नास्तीति स्वयम् एवोक्त्वा परापरविद्याभेदकरणपूर्वकम् (१.१.४) "अविद्यायामन्तरे वर्त्तमानाः" (१.२.८) इत्यादिना, तथा परप्राप्तिसाधनं सर्वसाधनसाध्यविषयवैराग्यपूर्वकं गुरुप्रसादलभ्यां ब्रह्मविद्यामाह "परीक्ष्य लोकान्" (१.२.१२) इत्यादिना। प्रयोजनं चासकृद्ब्रवीति "ब्रह्म वेद ब्रह्मैव भवति" (३.२.९) इति। "परामृताः परिमुच्यन्ति सर्वे" (३.२.६) इति च। ज्ञानमात्रे यद्यपि सर्वाश्रमिणां अधिकारः तथापि संन्यासनिष्ठैव ब्रह्मविद्या मोक्षसाधनम्, न कर्मसहिता इति "भैक्षचर्यां चरन्तः" (१.२.११) "संन्यासयोगात्" (३.२.६) इति च ब्रुवन् दर्शयति।

### ज्ञानकर्मविरोधनिरूपणम्

विद्याकर्मविरोधाच्च। न हि ब्रह्मात्मैकत्वदर्शनेन सह कर्म स्वप्नेऽपि सम्पादयितुं शक्यम्। विद्यायाः कालविशेषाभावाद् अनियतनिमित्तत्वात् कालसङ्कोचानुपपत्तिः। यत्तु गृहस्थेषु ब्रह्मविद्यासम्प्रदायकर्त्तृत्वादिलिङ्गं न तत् स्थितन्यायं बाधितुम् उत्सहते। न हि विधिशतेनापि तमःप्रकाशयोरेकत्र सद्भावः शक्यते कर्त्तुम्। किमुत लिङ्गैः केवलैः इति।

### उपनिषच्छब्दनिरुक्तिः

एवम् उक्तसम्बन्धप्रयोजनायाः उपनिषदोऽल्पाक्षरं ग्रन्थविवरणमारभ्यते। ये इमां ब्रह्मविद्यां उपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तः तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति, परं वा ब्रह्म गमयति, अविद्यादिसंसारकारणं चात्यन्तमवसादयति विनाशयति इत्युपनिषत्। उपनिपूर्वस्य सदेः एवमर्थस्मरणात्।

## मुण्डक १ खण्ड १

---

[1] शौनकीयशाखागतः।

(om brahmaa devaanaam)

ओं ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्त्ता भुवनस्य गोप्ता।

स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम् अथर्वाय ज्येष्ठपुत्राय प्राह ॥ Mu १.१.१ ॥

ब्रह्मा परिवृढः महान् धर्मज्ञानवैराग्यैश्वर्यैः सर्वान् अन्यान् अतिशेते इति। देवानां द्योतनवतामिन्द्रादीनां प्रथमः गुणैः प्रधानः सन्। प्रथमः अग्रे वा सम्बभूव अभिव्यक्तः। सम्यक् स्वातन्त्र्येण इत्यभिप्रायः। न तथा यथा धर्माधर्मवशात् संसारिणोऽन्ये जायन्ते। "योऽसावतीन्द्रियोऽग्राह्यः" (मनु. १.७) इत्यादिस्मृतेः। विश्वस्य सर्वस्य जगतः कर्त्ता उत्पादयिता। भुवनस्य उत्पन्नस्य गोप्ता पालयिता इति विशेषणं ब्रह्मणो विद्यास्तुतये। स एवं प्रख्यातमहत्वः ब्रह्मा ब्रह्मविद्यां ब्रह्मणः परमात्मनः विद्यां ब्रह्मविद्याम्। "येनाक्षरं पुरुषं वेद सत्यम्" (मु. १.२.१३) इति विशेषणात् परमात्म-विषया हि सा। ब्रह्मणा वा अग्रजेनोक्ता इति ब्रह्मविद्या। तां सर्वविद्याप्रतिष्ठां सर्वविद्याभिव्यक्तिहेतुत्वात् सर्वविद्याश्रयामित्यर्थः। सर्वविद्यावेद्यं वा वस्तु अनयैव विज्ञायत इति। "येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातम्" (छा. ६.१.३) इति श्रुतेः। सर्वविद्याप्रतिष्ठामिति च स्तौति विद्याम्। अथर्वाय ज्येष्ठपुत्राय प्राह ज्येष्ठश्चासौ पुत्रश्च। अनेकेषु ब्रह्मणः सृष्टिप्रकारेषु अन्यतमस्य सृष्टिप्रकारस्य प्रमुखे पूर्वमथर्वा सृष्टः इति ज्येष्ठः। तस्मै ज्येष्ठपुत्राय प्राह उक्तवान् ॥ १ ॥

(atharvane yaam)

अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्।

स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम्॥ Mu १.१.२ ॥

याम् एताम् अथर्वणे प्रवदेत अवदद्ब्रह्मविद्यां ब्रह्मा, ताम् एव ब्रह्मणः प्राप्ताम् अथर्वा पुरा पूर्वम् उवाच उक्तवान् अङ्गिरे अङ्गिर्नाम्ने ब्रह्मविद्याम्। स च अङ्गीः[2] भारद्वाजाय भरद्वाजगोत्राय सत्यवहाय सत्यवहनाम्ने प्राह प्रोक्तवान्। भारद्वाजः अङ्गिरसे स्वशिष्याय पुत्राय वा परावरां परस्मात् परस्मादवरेण प्राप्ता इति परावरा। परावरसर्वविद्याविषयव्याप्तेः वा। तां परावरामङ्गिरसे 'प्राह' इत्यनुषङ्गः॥ २॥

(shaunako ha vai)

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ।

कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति॥ Mu १.१.३॥

शौनकः शुनकस्यापत्यं महाशालः महागृहस्थः अङ्गिरसं भारद्वाजशिष्यमाचार्यं विधिवद् यथाशास्त्रमित्येतत्। उपसन्नः उपगतः सन् पप्रच्छ पृष्टवान्। शौनकाङ्गिरसोः सम्बन्धादर्वाग् विधिवद्विशेषणादुपसदनविधेः पूर्वेषामनियम इति गम्यते। मर्यादाकरणार्थम्, मध्यदीपिकान्यायार्थं वा विशेषणम्। अस्मदादिष्वपि उपसदनविधेः इष्टत्वात्।

किमित्याह - कस्मिन् नु भगवो विज्ञाते। 'नु' इति वितर्के। भगवो हे भगवन्। सर्वं यद् इदं विज्ञेयं विज्ञातं विशेषेण ज्ञातमवगतं भवति इति। एकस्मिन् ज्ञाते सर्वविद्भवति इति शिष्टप्रवादं श्रुतवान् शौनकः। तद्विशेषं

[2] अङ्गिः इति वा पाठः।

विज्ञातुकामः सन् कस्मिन् न्विति वितर्कयन् पप्रच्छ। अथवा लोकसामान्यदृष्ट्या ज्ञात्वैव पप्रच्छ। सन्ति लोके सुवर्णादिशकलभेदाः सुवर्णत्वाद्येकत्वविज्ञानेन विज्ञायमाना लौकिकैः। तथा किं न्वस्ति सर्वस्य जगद्भेदस्य एकं कारणम्, यदेकस्मिन् विज्ञाते सर्वं विज्ञातं भवतीति।

आक्षेपः

ननु अविदिते हि 'कस्मिन्?' इति प्रश्नोऽनुपपन्नः। 'किमस्ति तत्?' इति तदा प्रश्नो युक्तः। सिद्धे हि अस्तित्वे 'कस्मिन्?' इति स्यात्। यथा 'कस्मिन् निधेयम्?' इति।

समाधानम्

न। अक्षरबाहुल्यादायासभीरुत्वात् प्रश्नः सम्भवत्येव "कस्मिन् न्वेकस्मिन् विज्ञाते सर्ववित् स्यात्?" इति॥ ३ ॥

(tasmai sa hovaaca dve vidye)

**तस्मै स होवाच – द्वे विद्ये वेदितव्ये इति ह स्म।**

**यद्ब्रह्मविदो वदन्ति परा चैवापरा च॥** Mu **१.१.४॥**

तस्मै शौनकाय अङ्गिराः ह[3] किल उवाच[4]। किम्? इत्युच्यते - द्वे विद्ये वेदितव्ये इति एवं ह स्म किल। यद् ब्रह्मविदो वेदार्थाभिज्ञाः परमार्थदर्शिनो वदन्ति। के ते? इत्याह - परा च परमात्मविद्या अपरा च धर्माधर्मसाधन-तत्फलविषया।

आक्षेपः

ननु कस्मिन् विदिते सर्वविद्भवति इति शौनकेन पृष्टम्। तस्मिन् वक्तव्ये अपृष्टमाह अङ्गिराः द्वे विद्ये इत्यादिना।

समाधानम्

नैष दोषः। क्रमापेक्षत्वात् प्रतिवचनस्य। अपरा हि विद्या अविद्या। सा निराकर्त्तव्या। तद्विषये हि विदिते न किञ्चित् तत्त्वतो विदितं स्यादिति। 'निराकृत्य हि पूर्वपक्षं पश्चात्सिद्धान्तो वक्तव्यो भवति' इति न्यायात्॥४॥

(tatraaparaa rigvedo)

**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः।**

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।**

**अथ परा यया तदक्षरमधिगम्यते॥** Mu **१.१.५॥**

तत्र का अपरा? इत्युच्यते - ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः इत्येते चत्वारो वेदाः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति अङ्गानि षड्। एषा अपरा विद्या। अथ इदानीं इयं परा विद्या उच्यते यया तद् वक्ष्यमाणविशेषणम् अक्षरम् अधिगम्यते प्राप्यते। अधिपूर्वस्य गमेः प्रायशः प्राप्त्यर्थत्वात्। न च

---

[3] आह इति वा पाठः।

[4] उक्तवान् इत्यधिकं वा।

परप्राप्तेरवगमार्थस्य भेदोऽस्ति। अविद्याया अपाय एव हि परप्राप्तिः, न अर्थान्तरम्।

विद्यायाः परापरभेदमीमांसा – आक्षेपः

ननु ऋग्वेदादिबाह्या तर्हि सा कथं परा विद्या स्यात्, मोक्षसाधनं च। "या वेदबाह्याः स्मृतयः याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः" (मनु. १२.९५) इति हि स्मरन्ति। कुदृष्टित्वाद् निष्फलत्वादनादेया स्यात्। उपनिषदां च ऋग्वेदादिबाह्यत्वं स्यात्। ऋग्वेदादित्वे तु पृथक्करणमनर्थकं "अथ परा" इति।

समाधानम्

न। वेद्यविषयविज्ञानस्य विवक्षितत्वात्। उपनिषद्वेद्याक्षरविषयं हि विज्ञानमिह 'परा विद्या' इति प्राधान्येन विवक्षितम्। नोपनिषच्छब्दराशिः। वेदशब्देन तु सर्वत्र शब्दराशिः विवक्षितः। शब्दराश्यधिगमेऽपि यत्नान्तरमन्तरेण गुर्वभिगमनादिलक्षणं वैराग्यञ्च, नाक्षराधिगमः सम्भवतीति पृथक्करणं ब्रह्मविद्यायाः। परा विद्येति कथनञ्च इति॥ ५ ॥

यथा विधिविषये कर्त्राद्यनेककारकोपसंहारद्वारेण वाक्यार्थज्ञानकालादन्यत्र अनुष्ठेयोऽर्थोऽस्ति अग्निहोत्रादिलक्षणो न तथेह परविद्याविषये। वाक्यार्थज्ञानसमकाले एव तु पर्यवसितो भवति। केवलशब्दप्रकाशितार्थज्ञानमात्रनिष्ठाव्यतिरिक्ताभावात्। तस्मादिह परां विद्यां सविशेषणेन अक्षरेण विशिनष्टि 'यत्तदद्रेश्यम्' इत्यादिना –

(yat tad adreshyam)

**यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम्। अचक्षुःश्रोत्रं तदपाणिपादम्।**

**नित्यं विभुं सर्वगतं सुसूक्ष्मम्। तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥** Mu **१.१.६ ॥**

वक्ष्यमाणं बुद्धौ संहृत्य सिद्धवत् परामृश्यते 'यत्तत्'[5] इति। अद्रेश्यम् अदृश्यं सर्वेषां बुद्धीन्द्रियाणामगम्यम् इत्येतत्। दृशेर्बहिःप्रवृत्तस्य पञ्चेन्द्रियद्वारकत्वात्। अग्राह्यम् कर्मेन्द्रियाविषयम् इत्येतत्। अगोत्रम् गोत्रमन्वयः मूलम् इत्यनर्थान्तरम्। अगोत्रमनन्वयम् इत्यर्थः। न हि तस्य मूलमस्ति येनान्वितं स्यात्। अवर्णम् वर्ण्यन्ते इति वर्णाः। द्रव्यधर्माः, स्थूलत्वादयः, शुक्लत्वादयो वा। अविद्यमाना वर्णा यस्य तदवर्णमक्षरम्। अचक्षुःश्रोत्रं चक्षुश्च श्रोत्रं च, नामरूपविषये करणे सर्वजन्तूनाम्, ते अविद्यमाने यस्य तदचक्षुःश्रोत्रम्। "यः सर्वज्ञः सर्ववित्" (मु.

---

[5] यत्तदद्रेश्यं इत्यत्रोक्तं भूतयोन्यक्षरं प्रधानम्, शारीरः, ब्रह्म वेति संशय्य 'अदृश्यत्वादिगुणको धर्मोक्तेः' (ब्र.सू. १.२.१२) इत्यधिकरणे ब्रह्मैवेति निर्णीतम्। 'यः सर्वज्ञः सर्ववित्' इत्यादेः प्रधाने जीवे चासम्भवात्। 'तथा अक्षरात् सम्भवतीह विश्वम्' इति जायमानप्रकृतित्वेन निर्दिष्टाक्षरस्य 'तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते' इति सर्वज्ञब्रह्मणः उत्पत्तिश्रुतेः एकविज्ञानेन सर्वविज्ञानस्य प्रधाने जीवे च असम्भवाच्च। 'अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम्' (ब्र.सू. ३.३.३३) इत्यधिकरणे अत्र वाक्ये श्रूयमाणा अक्षरब्राह्मणोक्ता अस्थूलत्वादयश्च सर्वत्र उपसंहर्तव्याः ज्ञेयस्य ब्रह्मणः एकत्वात् प्रतिपादनप्रकारस्य च एकत्वादित्युक्तम्।

१.१.९) इत्यादि-चेतनावत्वविशेषणत्वात्[6] प्राप्तं संसारिणाम् इव चक्षुःश्रोत्रादिभिः करणैः अर्थसाधकत्वम्। तदिह अचक्षुःश्रोत्रमिति वार्यते। "पश्यत्यचक्षुः स शृणोत्यकर्णः" (श्वे. ३.१९) इत्यादिदर्शनात्। किञ्च तदपाणिपादं कर्मेन्द्रियरहितम् इत्येतत्।

यत एवमग्राह्यमग्राहकं च अतो नित्यम् अविनाशी। विभुं विविधं ब्रह्मादिस्थावरान्तप्राणिभेदैः भवतीति विभुम्। सर्वगतं व्यापकमाकाशवत् सुसूक्ष्मं शब्दादिस्थूलत्वकारणरहितत्वात्। शब्दादयो हि आकाशवाय्वादीनामुत्तरोत्तरं स्थूलत्वकारणानि। तदभावात् सुसूक्ष्मम्। किञ्च तदव्ययम् उक्तधर्मत्वादेव 'न व्येति' इत्यव्ययम्। न हि अनङ्गस्य स्वाङ्गापचय-लक्षणो व्ययः सम्भवति, शरीरस्य इव। नापि कोशापचयलक्षणो व्ययः सम्भवति, राज्ञ इव। नापि गुणद्वारको व्ययः सम्भवति, अगुणत्वात् सर्वात्मकत्वाच्च। यद् एवंलक्षणं भूतयोनिं भूतानां कारणम्, पृथिवी इव स्थावरजङ्गमानाम्। परिपश्यन्ति सर्वतः, आत्मभूतं सर्वस्य, अक्षरं पश्यन्ति धीराः धीमन्तः, विवेकिनः। ईदृशमक्षरं यया विद्यया अधिगम्यते सा परा विद्या इति समुदायार्थः॥ ६ ॥

भूतयोन्यक्षरमित्युक्तम्[7]। तत्कथं[8] भूतयोनित्वम्? इत्युच्यते प्रसिद्धदृष्टान्तैः -

(yathornanaabhih srijate)

**यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।**

**यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्॥** Mu १.१.७ ॥

यथा[9] लोके प्रसिद्धम् ऊर्णनाभिः लूताकीटः किञ्चित्कारणान्तरमनपेक्ष्य स्वयमेव सृजते, स्वशरीराव्यतिरिक्तानेव तन्तून् बहिः प्रसारयति। पुनस्तानेव गृह्णते च गृह्णाति स्वात्मभावमेव आपादयति। यथा च पृथिव्याम् ओषधयः व्रीह्यादि-स्थावरान्ता इत्यर्थः। स्वात्माव्यतिरिक्ता एव प्रभवन्ति। यथा च सतः विद्यमानाज्जीवतः पुरुषात् केशलोमानि केशाश्च लोमानि च सम्भवन्ति विलक्षणानि। यथा एते दृष्टान्ताः तथा विलक्षणं सलक्षणं च निमित्तान्तरानपेक्षाद्यथोक्तलक्षणाद् अक्षरात् सम्भवति समुत्पद्यते इह संसारमण्डले विश्वं समस्तं जगत्। अनेकदृष्टान्तोपादानं तु सुखार्थप्रबोधनार्थम्॥७॥

यद्ब्रह्मण उत्पद्यमानं विश्वं तदनेन क्रमेण उत्पद्यते, न युगपद्बदरमुष्टिप्रक्षेपवदिति क्रमनियमविवक्षार्थोऽयं मन्त्र आरभ्यते-

---

[6] इति चेतनावत्वविशेषणात् इति वा पाठः (गी.प्रे)

[7] भूतयोनिरक्षरमिति वा पाठः। तस्य नपुंसकत्वाभावात्।

[8] तद्भूतयोनित्वं कथम् इति योजना।

[9] 'अत्र न विलक्षणत्वादस्य तथात्वं च शब्दात्' (ब्र.सू. २.१.७) इति सूत्रेण जगन्न ब्रह्मोपादानकं तद्विलक्षणत्वात्। यद्यद्विलक्षणं तन्न तदुपादानकं यथा पटो न मृदुपादानः इति सामान्यमुखव्याप्त्युपष्टब्धेन अनुमानेन ब्रह्मणो जगदुपादानत्वाक्षेपे प्राप्ते 'दृश्यते तु' (ब्र.सू. २.१.९) इति सूत्रेण समाधानमुक्तम्। दृश्यते हि विलक्षणयोरपि उपादानोपादेयभावः। यथोर्णनाभिः चेतनः तच्छरीरात् तन्तवः इति एतन्मन्त्रोदाहरणेन व्याभिचाराद्दूषणमुक्तम्।

- (tapasaa ciiyate)

**तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।**

**अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्॥** Mu १.१.८ ॥

तपसा ज्ञानेन उत्पत्तिविधिज्ञतया भूतयोन्यक्षरं ब्रह्म चीयते उपचीयते उत्पिपादयिषदिदं जगत्, अङ्कुरम् इव बीजम्, उच्छूनतां गच्छति। पुत्रम् इव पिता हर्षेण। एवं सर्वज्ञतया सृष्टिस्थितिसंहारशक्तिविज्ञानवत्तया उपचितात् ततः ब्रह्मणः अन्नम् अद्यते भुज्यते इत्यन्नमव्याकृतं साधारणं संसारिणां व्याचिकीर्षितावस्थारूपेण अभिजायते उत्पद्यते। ततश्च अव्याकृताद्व्याचिकीर्षितावस्थावतः अन्नात् प्राणः हिरण्यगर्भः ब्रह्मणो ज्ञानक्रियाशक्त्यधिष्ठितजगत्साधारणः अविद्याकामकर्मभूतसमुदायबीजांकुरः जगदात्मा। 'अभिजायते' इत्यनुषङ्गः। तस्माच्च प्राणाद् मनः मनआख्यं सङ्कल्प-विकल्पसंशयनिर्णयाद्यात्मकमभिजायते। ततोऽपि सङ्कल्पाद्यात्मकान्मनसः सत्यं सत्याख्यमाकाशादिभूतपञ्चकम् अभिजायते। तस्मात् सत्याख्याद्भूतपञ्चकादण्डक्रमेण सप्तलोकाः भूरादयः। तेषु मनुष्यादिप्राणिवर्णाश्रमक्रमेण कर्माणि। कर्मसु च निमित्तभूतेषु अमृतं कर्मजं फलम्। यावत्कर्माणि कल्पकोटिशतैरपि न विनश्यन्ति तावत्फलं न विनश्यति इत्यमृतम्॥८॥

उक्तमेवार्थमुपसञ्जिहीर्षुः मन्त्रः वक्ष्यमाणार्थमाह -

(yah sarvajnah)

**यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।**

**तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते॥** Mu १.१.९ ॥

यः उक्तलक्षणः अक्षराख्यः सर्वज्ञः सामान्येन सर्वं जानाति इति सर्वज्ञः। विशेषेण सर्वं वेत्ति इति सर्ववित्। यस्य ज्ञानमयं ज्ञानविकारमेव सार्वज्ञ्यलक्षणं तपः न आयासलक्षणम्। तस्माद् यथोक्तात् सर्वज्ञाद् एतद् उक्तं कार्यलक्षणं ब्रह्म हिरण्यगर्भाख्यं जायते। किञ्च नाम असौ देवदत्तः, यज्ञदत्तः, इत्यादिलक्षणम्। रूपम् इदं शुक्लम्, नीलम्, इत्यादि अन्नं च व्रीहियवादिलक्षणं जायते पूर्वमन्त्रोक्तक्रमेण इत्यविरोधो द्रष्टव्यः॥ ९ ॥

॥ इति प्रथममुण्डके प्रथमः खण्डः॥

## मुण्डक १ खण्ड २

पूर्वापरसम्बन्धनिरूपणम्

साङ्गाः वेदाः अपरा विद्योक्ता "ऋग्वेदो यजुर्वेदः..." इत्यादिना (मु. १.१.५)। "यत्तदद्रेश्यम्..." (मु. १.१.६) इत्यादिना "नामरूपमन्नं च जायते" (मु. १.१.९) इत्यन्तेन ग्रन्थेन उक्तलक्षणमक्षरं यया विद्यया अधिगम्यते इति परा विद्या सविशेषणोक्ता[10]। अतःपरमनयोः विद्ययोः विषयौ विवेक्तव्यौ संसारमोक्षौ इत्युत्तरो ग्रन्थ आरभ्यते।

तत्र अपरविद्याविषयः कर्त्रादिसाधनक्रियाफलभेदरूपः संसारोऽनादिरनन्तो दुःखस्वरूपत्वाद् हातव्यः प्रत्येकं

---

[10] सविषया इति यावत्।

शरीरिभिः सामस्त्येन, नदीश्रोतोवदव्यवच्छेदरूपसम्बन्धः, तदुपशमलक्षणो मोक्षः परविद्याविषयः अनाद्यनन्तः अजरः अमरः अमृतः अभयः शुद्धः प्रसन्नः स्वात्मप्रतिष्ठालक्षणः परमानन्दः अद्वय इति। पूर्वं तावदपरविद्यायाः विषयप्रदर्शनार्थम् आरम्भः। तद्दर्शने हि तन्निर्वेदोपपत्तेः। तथा च वक्ष्यति "परीक्ष्य लोकान् कर्मचितान्" (१.२.१२) इत्यादिना। न हि अप्रदर्शिते परीक्षा उपपद्यते इति तत्प्रदर्शयन्नाह –

(mantreshu)

**तदेतत् सत्यम्।**

**मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि।**

**तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके॥** Mu १.२.१ ॥

तदेतत् सत्यम् अवितथम्। किं तत्? मन्त्रेषु ऋग्वेदाद्याख्येषु कर्माणि अग्निहोत्रादीनि मन्त्रैरेव प्रकाशितानि कवयः मेधाविनः वसिष्ठादयो यानि अपश्यन् दृष्टवन्तः यत्तदेतत् सत्यम् एकान्तपुरुषार्थसाधनत्वात्। तानि च वेदविहितानि ऋषिदृष्टानि कर्माणि त्रेतायां त्रयीसंयोगलक्षणायां हौत्राध्वर्यवौद्गात्रप्रकारायाम्[11] अधिकरणभूतायां बहुधा बहुप्रकारं सन्ततानि प्रवृत्तानि कर्मिभिः क्रियमाणानि। त्रेतायां वा युगे प्रायशः प्रवृत्तानि। अतो यूयं तानि आचरथ निर्वर्त्तयत नियतं नित्यं सत्यकामाः यथाभूतकर्मफलकामाः सन्तः। एषः वः युष्माकं पन्थाः मार्गः सुकृतस्य स्वयं निर्वर्त्तितस्य कर्मणः लोके फलनिमित्तम्। लोक्यते दृश्यते भुज्यते इति कर्मफलं लोक उच्यते। तदर्थं तत्प्राप्तये एषः मार्गः इत्यर्थः। यान्येतानि अग्निहोत्रादीनि त्रय्यां विहितानि कर्माणि तान्येषः पन्था अवश्यफलप्राप्तिसाधनमित्यर्थः॥ १ ॥

तत्र अग्निहोत्रमेव तावत्प्रथमं प्रदर्शनार्थमुच्यते सर्वकर्मणां प्राथम्यात्[12]। तत्कथम्?

(yadaa lelaayate)

**यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने।**

**तदाज्यभागावन्तरेण आहुतीः प्रतिपादयेत्॥** Mu १.२.२॥

यदा एव इन्धनैरभ्याहितैः सम्यगिद्धे समिद्धे हव्यवाहने लेलायते चलति अर्चिः, तदा तस्मिन् काले लेलायमाने चलत्यर्चिषि आज्यभागौ आज्यभागयोः[13] अन्तरेण मध्ये आवापस्थाने आहुतीः प्रतिपादयेत् प्रक्षिपेद्देवतामुद्दिश्य। अनेकाहःप्रयोगापेक्षया 'आहुतीः' इति बहुवचनम्॥ २ ॥

एष सम्यगाहुतिप्रक्षेपादिलक्षणः कर्ममार्गः लोकप्राप्तये पन्थाः। तस्य च सम्यक्करणं दुष्करम्। [14]विपत्तयस्त्वनेकाः

---

[11] ऋग्वेदविहितं हौत्रकर्म। यजुर्वेदविहितं आध्वर्यवकर्म तथा सामवेदविहितमौद्गात्रकर्म।

[12] प्राधान्यात् इति वा। आधानाख्ये श्रौतकर्मणि कृते त्रेताग्निसम्पत्तौ प्रथममग्निहोत्रं कर्तव्यम्।

[13] दर्शपौर्णमासे आहवनीयाग्नेः उत्तरभागे अग्नये स्वाहा इति दक्षिणभागे सोमाय स्वाहा इति च आहुतिद्वयं दीयते। ते आज्यभागौ इति कथ्येते। तयोः मध्ये आवापस्थाने अन्या आहुतयः दीयन्ते।

[14] मन्त्रलोपतन्त्रलोपक्रियालोपादिषु हविषः अपाके च।

भवन्ति। कथम्? –

(yasyaagnihotram)

यस्याग्निहोत्रमदर्शमपौर्णमासम्। अचातुर्मास्यमनाग्रयणमतिथिवर्जितं च।

अहुतमवैश्वदेवमविधिना हुतम्। आसप्तमांस्तस्य लोकान् हिनस्ति॥ Mu १.२.३॥

यस्य अग्निहोत्रिणः अग्निहोत्रम् अदर्शं दर्शाख्येन कर्मणा वर्जितम्। अग्निहोत्रिणः अवश्यकर्त्तव्यत्वाद्दर्शस्य अग्निहोत्र-सम्बन्धि अग्निहोत्रविशेषणम् इव भवति। तदक्रियमाणम् इत्येतत्। तथा अपौर्णमासमित्यादिषु अपि अग्निहोत्र-विशेषणत्वं द्रष्टव्यम्, अग्निहोत्राङ्गत्वस्याविशिष्टत्वात्। अपौर्णमासं पौर्णमासकर्म-वर्जितम्। अचातुर्मास्यं चातुर्मास्य-कर्मवर्जितम्। अनाग्रयणम् आग्रयणं शरदादिकर्त्तव्यम्। तच्च न क्रियते यस्य। तथा अतिथिवर्जितं च अतिथिपूजनं च अहन्यहनि अक्रियमाणं यस्य। स्वयं सम्यगग्निहोत्रकाले अहुतम्। अदर्शादिवद् अवैश्वदेवं वैश्वदेवकर्मवर्जितम्। हूयमानमपि अविधिना हुतम्, न यथाहुतमित्येतत्।

एवं दुःसम्पादितमसम्पादितमग्निहोत्राद्युपलक्षितं कर्म किं करोति? इत्युच्यते – आसप्तमान् सप्तमसहितान् तस्य कर्त्तुः लोकान् हिनस्ति हिनस्ति इव आयासमात्रफलत्वात्। सम्यक् क्रियमाणेषु हि कर्मसु कर्मपरिणामानुरूपेण भूरादयः सत्यान्ताः सप्त लोकाः फलं प्राप्यन्ते। ते लोकाः एवंभूतेन अग्निहोत्रादि-कर्मणा त्वप्राप्यत्वाद् हिंस्यन्ते इव। आयासमात्रं त्वव्यभिचारि इत्यतो हिनस्तीत्युच्यते। पिण्डदानाद्यनुग्रहेण वा सम्बध्यमानाः पितृपितामहप्रपितामहाः पुत्रपौत्रप्रपौत्राः स्वात्मोपकाराः सप्त लोका उक्तप्रकारेण अग्निहोत्रादिना न भवन्ति इति हिंस्यन्ते इत्युच्यते ॥ ३ ॥

(kaalii karaalii)

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा।

स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः॥ Mu १.२.४॥

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः। काल्याद्या विश्वरुच्यन्ता लेलायमाना अग्नेर्हविराहुतिग्रसनार्था एताः सप्त जिह्वाः॥ ४ ॥

(eteshu yashcarate)

एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन्।

तं नयन्त्येताः सूर्यस्य रश्मयः यत्र देवानां पतिरेकोऽधिवासः॥ Mu १.२.५॥

एतेषु अग्निजिह्वाभेदेषु यः अग्निहोत्री चरते कर्माचरत्यग्निहोत्रादि भ्राजमानेषु दीप्यमानेषु यथाकालं च यस्य कर्मणो यः कालः[15] तत्कालं यथाकालम्। यजमानं आददायन् आददानाः आहुतयः यजमानेन निर्वर्त्तिताः तं नयन्ति प्रापयन्ति एताः आहुतयो या इमा अनेन निर्वर्त्तिताः सूर्यस्य रश्मयः भूत्वा। रश्मिद्वारैः इत्यर्थः। यत्र यस्मिन् स्वर्गे

[15] तत्कालं यथाकालमित्यस्य स्थाने तं कालमनतिक्रम्य तम् इति वा पाठः।

देवानां पतिः इन्द्रः एकः सर्वानुपरि अधिवसतीति अधिवासः ॥ ५ ॥

कथं सूर्यस्य रश्मिभिर्यजमानं वहन्ति? इत्युच्यते –

(ehi ehi iti)

एह्येहीति तमाहुतयः सुवर्चसः। सूर्यस्य रश्मिभिर्यजमानं वहन्ति।

प्रियां वाचमभिवदन्त्योऽर्चयन्त्यः। एष वः पुण्यः सुकृतो ब्रह्मलोकः॥ Mu १.२.६ ॥

एह्येहीति आह्वयन्त्यः सुवर्चसः दीप्तिमत्यः। किञ्च प्रियाम् इष्टां वाचं स्तुत्यादिलक्षणां अभिवदन्त्यः उच्चारयन्त्यः अर्चयन्त्यः पूजयन्त्यश्च "एषः वः युष्माकं पुण्यः सुकृतः (पन्थाः) ब्रह्मलोकः फलरूपः" – एवं प्रियां वाचमभिवदन्त्यो वहन्तीत्यर्थः। ब्रह्मलोकः स्वर्गः प्रकरणात्[16] ॥ ६ ॥

एतच्च ज्ञानरहितं कर्म एतावत् फलमविद्याकामकर्मकार्यम्। अतोऽसारं दुःखमूलमिति निन्द्यते –

(plavaa hyete)

प्लवा ह्येते अदृढा यज्ञरूपाः। अष्टादशोक्तमवरं येषु कर्म।

एतच्छ्रेयो येऽभिनन्दन्ति मूढाः। जरामृत्युं ते पुनरेवापि यन्ति॥ Mu १.२.७ ॥

प्लवाः विनाशिन इत्यर्थः। हि यस्माद् एते अदृढाः अस्थिराः यज्ञरूपाः यज्ञस्य रूपाणि यज्ञरूपाः यज्ञनिर्वर्त्तकाः अष्टादश अष्टादशसङ्ख्याकाः – षोडश ऋत्विजः, पत्नी, यजमानश्चेति अष्टादश। एतदाश्रयं कर्म उक्तं कथितं शास्त्रेण। येषु अष्टादशसु अवरं केवलं ज्ञानवर्जितं कर्म। अतस्तेषामवरकर्माश्रयाणामष्टादशानामदृढतया प्लवत्वात् प्लवते सह फलेन तत्साध्यं कर्म। कुण्डविनाशादिव क्षीरदध्यादीनां तत्स्थानां नाशः। यत एवम् "एतत् कर्म श्रेयः श्रेयःकारणम्" इति[17] ये अभिनन्दन्ति अभिहृष्यन्ति अविवेकिनः मूढाः अतः ते जरां च मृत्युं च जरामृत्युं किञ्चित्कालं स्वर्गे स्थित्वा पुनरेवापि यन्ति भूयोऽपि गच्छन्ति॥ ७ ॥

किञ्च – (avidyaayaam antare)

अविद्यायामन्तरे वर्त्तमानाः। स्वयं धीराः पण्डितं मन्यमानाः।

जङ्घन्यमानाः परियन्ति मूढाः। अन्धेनैव नीयमाना यथान्धाः॥ Mu १.२.८ ॥

अविद्यायाम् अन्तरे मध्ये वर्त्तमानाः अविवेकप्रायाः। स्वयं वयमेव धीराः धीमन्तः पण्डिताः विदितवेदितव्याश्च इति मन्यमानाः आत्मानं सम्भावयन्तः। ते च जङ्घन्यमानाः जरारोगाद्यनेकानर्थव्रातैः हन्यमानाः। भृशं पीड्यमानाः परियन्ति विभ्रमन्ति मूढाः दर्शनवर्जितत्वात्। अन्धेनैव अचक्षुष्केणैव नीयमानाः प्रदर्श्यमानमार्गाः यथा लोके अन्धाः अक्षिरहिता गर्तकण्टकादौ पतन्ति तद्वत्॥ ८ ॥

---

16 केवलकर्मप्रकरणादित्यर्थः। केवलकर्मणश्च कर्मणा पितृलोकः इति फलश्रुतेः इति भावः।

17 श्रेयःकरणमिति वा श्रेयःसाधनमिति वा पाठः।

किञ्च – (avidyaayaam bahudhaa)

**अविद्यायां बहुधा वर्त्तमानाः। वयं कृतार्था इत्यभिमन्यन्ति बालाः।**

**यत् कर्मिणो न प्रवेदयन्ति रागात्। तेनातुराः क्षीणलोकाश्च्यवन्ते॥ Mu १.२.९॥**

अविद्यायां बहुधा बहुप्रकारं वर्त्तमानाः। वयम् एव कृतार्थाः कृतप्रयोजनाः इति एवम् अभिमन्यन्ति[18] अभिमानं कुर्वन्ति बालाः अज्ञानिनः। यद् यस्मादेवं कर्मिणो न प्रवेदयन्ति तत्त्वं न जानन्ति रागात् कर्मफलरागाभिभवनिमित्तं तेन कारणेन आतुराः दुःखार्त्ताः सन्तः क्षीणलोकाः क्षीणकर्मफलाः स्वर्गलोकात् च्यवन्ते॥ ९ ॥

(ishtaapuurttam)

**इष्टापूर्त्तं मन्यमाना वरिष्ठम्। नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।**

**नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा। इमं लोकं हीनतरं वा विशन्ति॥ Mu १.२.१०॥**

इष्टं यागादि श्रौतं कर्म पूर्त्तं वापीकूपतडागादि स्मार्त्तं मन्यमानाः एतदेव अतिशयेन पुरुषार्थसाधनं वरिष्ठं प्रधानम् इति चिन्तयन्तः अन्यद् आत्मज्ञानाख्यं श्रेयः श्रेयःसाधनं न वेदयन्ते न जानन्ति प्रमूढाः पुत्रपशुबन्ध्वादिषु प्रमत्ततया मूढाः। ते च नाकस्य स्वर्गस्य पृष्ठे उपरिस्थाने सुकृते भोगायतने अनुभूत्वा अनुभूय कर्मफलम्। पुनः इमं लोकं मानुषमस्माद् हीनतरं वा तिर्यङ्नरकादिलक्षणं यथाकर्मशेषं विशन्ति॥ १० ॥

(tapah shraddhe)

**तपःश्रद्धे ये ह्युपवसन्त्यरण्ये। शान्ता विद्वांसो भेक्ष्यचर्या चरन्तः।**

**सूर्यद्वारेण ते विरजाः प्रयान्ति। यत्रामृतः स पुरुषो ह्यव्ययात्मा॥ Mu १.२.११॥**

ये पुनः तद्विपरीता ज्ञानयुक्ताः वानप्रस्थाः संन्यासिनश्च तपःश्रद्धे हि – तपः स्वाश्रमविहितं कर्म, श्रद्धा हिरण्यगर्भादि-विषया विद्या, ते तपःश्रद्धे – उपवसन्ति सेवन्ते अरण्ये वर्त्तमानाः सन्तः शान्ताः उपरतकरणग्रामाः विद्वांसः गृहस्थाश्च ज्ञानप्रधानाः इत्यर्थः। भैक्ष्यचर्या चरन्तः परिग्रहाभावात्। उपवसन्त्यरण्ये इति सम्बन्धः। सूर्यद्वारेण सूर्योपलक्षितेन उत्तरायणेन पथा ते विरजाः विरजसः क्षीणपुण्यपापकर्माणः सन्तः इत्यर्थः। प्रयान्ति प्रकर्षेण यान्ति यत्र यस्मिन् सत्यलोकादौ अमृतः सः पुरुषः प्रथमजो हिरण्यगर्भो हि अव्ययात्मा अव्ययस्वभावः, यावत्संसारस्थायी। एतदन्तास्तु संसारगतयः, अपरविद्यागम्याः।

**पूर्वपक्षः**

ननु एतं मोक्षमिच्छन्ति केचित्।

**सिद्धान्तः**

न। "इहैव सर्वे प्रविलीयन्ति कामाः" (मु. ३.२.२), "ते सर्वगं सर्वतः प्राप्य धीराः युक्तात्मानः सर्वमेवाविशन्ति" (मु. ३.२.५) इत्यादिश्रुतिभ्यः। अप्रकरणाच्च। अपरविद्याप्रकरणे हि प्रवृत्ते न हि अकस्मान्मोक्षप्रसङ्गोऽस्ति।

---

[18] छान्दसम्। अभिमन्यन्ते। आ.प।

विरजस्त्वं तु आपेक्षिकम्। समस्तमपरविद्याकार्यं साध्यसाधनलक्षणं क्रियाकारकफलभेदभिन्नं द्वैतम् एतावदेव यद् हिरण्यगर्भ-प्राप्त्यवसानम्। तथा च मनुनोक्तं स्थावराद्यां संसारगतिमनुक्रामता "ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च। उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः" (मनु १२.५०) इति॥ ११ ॥

अथेदानीं अस्मात्साध्यसाधनरूपात्सर्वस्मात् संसाराद्विरक्तस्य परस्यां विद्यायामधिकारप्रदर्शनार्थमिदमुच्यते –

(pariikshya lokaan)

**परीक्ष्य लोकान् कर्मचितान् ब्राह्मणः। निर्वेदमायान्नास्त्यकृतः कृतेन।**

**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्। समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥** Mu १.२.१२ ॥

परीक्ष्य यदेतद् ऋग्वेदाद्यपरविद्याविषयं स्वाभाविक्यविद्याकामकर्मदोषवत्पुरुषानुष्ठेयमविद्यादिदोषवन्तमेव पुरुषं प्रति विहितत्वात्। तदनुष्ठानकार्यभूताश्च लोकाः ये दक्षिणोत्तरमार्गलक्षणाः फलभूताः। ये च विहिताकरण-प्रतिषेधातिक्रमदोषसाध्याः नरकतिर्यक्प्रेतलक्षणाः। तानेतान् परीक्ष्य प्रत्यक्षानुमानोपमानागमैः सर्वतो याथात्म्येन अवधार्य। लोकान् संसारगतिभूतान्, अव्यक्तादिस्थावरान्तान्, व्याकृताव्याकृतलक्षणान्, बीजाङ्कुरवद् इतरेतरोत्पत्ति-निमित्तान्, अनेकानर्थशतसहस्रसङ्कुलान्, कदलीगर्भवदसारान्, मायामरीच्युदकगन्धर्वनगराकारस्वप्नजलबुद्बुदफेन-समान्, प्रतिक्षणप्रध्वंसान् पृष्ठतः कृत्वा अविद्याकामदोषप्रवर्तितकर्मचितान् धर्माधर्मनिर्वर्त्तितान् इत्येतत्। ब्राह्मणस्यैव विशेषतोऽधिकारः सर्वत्यागेन ब्रह्मविद्यायाम् इति ब्राह्मणग्रहणम्।

परीक्ष्य लोकान् किं कुर्यात्? इत्युच्यते – निर्वेदं निःपूर्वो विदिरत्र वैराग्यार्थे। वैराग्यम् आयात् कुर्यादित्येतत्। स वैराग्यप्रकारः प्रदर्श्यते। इह संसारे नास्ति कश्चिदपि अकृतः पदार्थः। सर्वे एव हि लोकाः कर्मचिताः। कर्मकृतत्वाच्चानित्याः। न नित्यं किञ्चिदस्ति इत्यभिप्रायः। सर्वं तु कर्म अनित्यस्यैव साधनम्। यस्माच्चतुर्विधमेव हि सर्वं कर्मकार्यम् – उत्पाद्यम्, आप्यम्, संस्कार्यम्, विकार्यम् वा। नातःपरं कर्मणो विशेषोऽस्ति। अहं च नित्येनामृतेनाभयेन कूटस्थेनाचलेन ध्रुवेण अर्थेन अर्थी, न तद्विपरीतेन। अतः किं कृतेन कर्मणा आयासबहुलेन अनर्थसाधनेन इत्येवं निर्विण्णः।

अभयं शिवमकृतं नित्यं पदं यत् तद्विज्ञानार्थं विशेषेण अधिगमार्थं सः निर्विण्णो ब्राह्मणः गुरुमेव आचार्यं शमदम-दयादिसम्पन्नम् अभिगच्छेत्। "शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात्" इत्येतद्गुरुमेव इत्यवधारण-फलम्। समित्पाणिः समिद्भारगृहीतहस्तः श्रोत्रियम् अध्ययनश्रुतार्थसम्पन्नम् ब्रह्मनिष्ठम् हित्वा सर्वकर्माणि केवले अद्वये ब्रह्मणि निष्ठा यस्य सोऽयं ब्रह्मनिष्ठः। 'जपनिष्ठः' 'तपोनिष्ठः' इति यद्वत्। न हि कर्मिणो ब्रह्मनिष्ठता सम्भवति कर्मात्मज्ञानयोः विरोधात्। सः तं गुरुं विधिवदुपसन्नः प्रसाद्य पृच्छेदक्षरं पुरुषं सत्यम्॥ १२॥

(tasmai sa vidvaan)

**तस्मै स विद्वानुपसन्नाय सम्यक्। प्रशान्तचित्ताय शमान्विताय।**

**येनाक्षरं पुरुषं वेद सत्यम्। प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्॥** Mu १.२.१३ ॥

तस्मै स विद्वान् गुरुः ब्रह्मविद् उपसन्नाय उपगताय सम्यक् यथाशास्त्रमित्येतत्। प्रशान्तचित्ताय उपरतदर्पादिदोषाय शमान्विताय बाह्येन्द्रियोपरमेण च युक्ताय। सर्वतो विरक्ताय इत्येतत्। येन विज्ञानेन, यया विद्यया परया अक्षरम् अद्रेश्यादिविशेषणं तदेवाक्षरं पुरुषं पुरुषशब्दवाच्यं पूर्णत्वात्, पुरि शयनाच्च सत्यं तदेव परमार्थस्वाभाव्यात्। अक्षरं च अक्षरणात्, अक्षतत्वात्, अक्षयत्वाच्च वेद विजानाति तां ब्रह्मविद्यां तत्त्वतो यथावत् प्रोवाच प्रब्रूयादित्यर्थः। आचार्यस्यापि अयं नियमो यन्न्यायप्राप्तसच्छिष्यनिस्तारणमविद्यामहोदधेः॥ १३ ॥

॥ इति प्रथममुण्डके द्वितीयः खण्डः॥

## मुण्डक २ खण्ड १

अपरविद्यायाः सर्वं कार्यमुक्तम्। स च संसारो यत्सारः[19], यस्मान्मूलादक्षरात् सम्भवति, यस्मिंश्च प्रलीयते, तदक्षरं पुरुषाख्यं सत्यम्। 'यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवति', तत् परस्या ब्रह्मविद्याया विषयः। स वक्तव्य इत्युत्तरो ग्रन्थ आरभ्यते –

(yathaa sudiiptaad)

**तदेतत्सत्यम्। यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः। सहस्रशः प्रभवन्ते सरूपाः।**

**तथाक्षराद्विविधाः सोम्य भावाः। प्रजायन्ते तत्र चैवापियन्ति॥** Mu २.१.१ ॥

यदपरविद्याविषयं[20] कर्मफललक्षणं सत्यं तदापेक्षिकम्। इदं तु परविद्याविषयं परमार्थसल्लक्षणत्वात्[21] तदेतत् सत्यं यथाभूतं विद्याविषयम्। अविद्याविषयत्वाच्च अनृतमितरत्। अत्यन्तपरोक्षत्वात् कथं नाम प्रत्यक्षवत् सत्यमक्षरं प्रतिपद्येरन्निति दृष्टान्तमाह – यथा सुदीप्तात् सुष्ठु दीप्तादिद्धात् पावकाद् अग्नेः विस्फुलिङ्गाः अग्न्यवयवाः सहस्रशः अनेकशः प्रभवन्ते निर्गच्छन्ति सरूपाः अग्निसलक्षणा एव। तथा उक्तलक्षणाद् अक्षराद् विविधाः नानादेहोपाधिभेदमनु विधीयमानत्वाद्विविधाः हे सोम्य भावाः जीवाः आकाशादिव घटादिपरिच्छिन्नाः सुषिरभेदा घटाद्युपाधिप्रभेदमनु भवन्ति। एवं नानानामरूपकृतदेहोपाधिप्रभवमनु प्रजायन्ते। तत्र चैव तस्मिन् एवाक्षरे अपियन्ति देहोपाधिविलयमनु लीयन्ते घटादिविलयमनु इव सुषिरभेदाः। यथा आकाशस्य सुषिरभेदोत्पत्तिप्रलयनिमित्तत्वं घटाद्युपाधिकृतमेव तद्वद् अक्षरस्यापि नामरूपकृतदेहोपाधिनिमित्तमेव जीवोत्पत्तिप्रलयनिमित्तत्वम्॥ १ ॥

नामरूपबीजभूतात् अव्याकृताख्यात् स्वविकारापेक्षया परात् अक्षरात्परं यत् सर्वोपाधिभेदवर्जितमक्षरस्यैव स्वरूपम्

[19] प्रतीतरूपेण कदलीगर्भवदसारः। परमार्थदृष्ट्या तु अक्षरसारः अयम्।

[20] विषीयते विशेष्यते विद्या अनेन इति व्युत्पत्या विषयशब्दस्य वस्तुपरत्वान्नपुंसकलिङ्गत्वम्। (अपरविद्यायाः विषयम्।)

[21] परमार्थतः सल्लक्षणत्वादिति वा पाठः। अत्यन्ताबाध्यत्वादित्यर्थः।

**ब्रह्मनिष्ठं विधिवदुपेत्य प्रत्यगात्मविषयादन्यत्र शरणम् अपश्यन्नभयं नित्यं शिवमचलम् इच्छन्नपप्रच्छेति कल्प्यते–**

"This is not attainable through reasoning" (Katha Upa. 1, 2-9), says the sruti. Then, from the instructions in the srutis and smritis such as, "One who has a teacher knows" (Chha. VI, 14-2), **"Vidya** obtained from a teacher alone leads to glory" (Chha. Upa. IV, 9-3) and "Know that by prostration (before perfected souls)" (Gita IV-34), it can be seen that one, finding no other shelter than the knowledge of the inner Self, and approaching a teacher according to the usual customs, who is well-established in Brahman, asked (as follows), with the desire to know the fearless, eternal, auspicious and immutable (Brahman):

**ॐ केनेषितं पतति प्रेषितं मनः। केन प्राणः प्रथमः प्रैति युक्तः। केनेषितां वाचमिमां वदन्ति। चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ १ ॥**

1. **Wished by whom is the mind directed to fall (on its objects)? Directed by whom does the foremost vital air move? By whom is wished this speech which the people utter? Who is the radiant being that unites the eye and the ear (with their objects)?**

**केन इषितं केन कर्त्रा इषितम् इष्टमभिप्रेतं सत् मनः पतति गच्छति स्वविषयं प्रतीति सम्बध्यते इषेराभीक्ष्ण्यार्थस्य गत्यर्थस्य चेहासम्भवादिच्छार्थस्यैवैतद्रूपमिति गम्यते। इषितमिति इट्प्रयोगस्तुच्छान्दसः। तस्यैव प्रपूर्वस्य नियोगार्थे प्रेषितमित्येतत्। तत्र प्रेषितमित्येवोक्ते प्रेषयितृप्रेषणविशेषविषयाकाङ्क्षा स्यात् केन प्रेषयितृविशेषेण, कीदृशं वा प्रेषणमिति। इषितमिति तु विशेषणे सति तदुभयं निवर्तते कस्येच्छामात्रेण प्रेषितमित्यर्थविशेषनिर्धारणात्।**



Desired by what doer is the mind directed towards its objects? Since such meanings of the root ***'ish'** as 'repetition' or 'motion' do not fit in here, it is understood that it is used in the sense of 'desire'. The usage **'it'** (इट्) in **Ishitam** (इषितं) is purely Vedic for according to the rules of grammar other than Vedic it should be **Ishtam** (इष्टं) and not इषितं **(Ishitam).** To this (i.e. **ishitam) 'pra'** (प्र) has been prefixed. Thus the word **preshitam** **(directed) came into being. If the word **preshitam** alone is used, then doubts regarding the 'director' and the 'manner of direction', such as by whom is directed, and what kind of direction it is, might arise. By the usage of the attribute **ishitam** (desired) both the doubts are satisfied, since the specific meaning, i.e. 'directed by whose mere wish', becomes determined by it.

**यद्येषोऽर्थोऽभिप्रेतः स्यात्, केनेषितमित्येतावतैव सिद्धत्वात्प्रेषितमिति न वक्तव्यम्। अपि च शब्दाधिक्यादर्थाधिक्यं युक्तमिति इच्छया कर्मणा वाचा वा केन प्रेषितमित्यर्थविशेषोऽवगन्तुं युक्तः।**

**(Purvapaksha):—** If this be the meaning intended, it is satisfied by the term 'wished by whom' itself, and the word 'directed' need not be used. Moreover, since it is reasonable that from more words will come out more meanings, it becomes necessary to know specifically by what is it directed, i.e. by desire (wish), action or speech?

**न, प्रश्नसामर्थ्यात्, देहादिसंघातादनित्यात्कर्मकार्याद्विरक्तः अतोऽन्यत्कूटस्थं नित्यं वस्तु बुभुत्समानः पृच्छतीति सामर्थ्यादुपपद्यते। इतरथा इच्छावाक्कर्मभिर्देहादिसंघातस्य प्रेरयितृत्वं प्रसिद्धमिति प्रश्नोऽनर्थक एव स्यात्।**

* This root carries meanings such as 'to repeat', 'to move' and 'to desire'. In the Text it is used in the sense mentioned last.

** **Pra + ishitam = Preshitam. Pra** is **upasarga** (prefix). As shown in the preceding footnote, the root **ish** has three meanings. When the prefix **pra** is added, **preshitam** comes into being. Then it means 'directed' 'sent' or 'despatched'.

**(Samadhana):—** No, (it is not so) because of the nature of the question which makes it clear that only the man who is dispassionate towards the transitory effects of actions in the form of the aggregate of body, senses etc. and who has therefore become desirous of knowing something other than it, *immutable and eternal, will ask this question. Otherwise, the question will simply be meaningless inasmuch as it is well-known that the aggregate of body etc. directs (the mind) through wish (desire), speech and act.

**एवमपि प्रेषितशब्दस्यार्थो न प्रदर्शित एव ।**

**(Purvapaksha):—** Even so, the meaning of the word 'directed' has not been revealed yet.

**न; संशयवतोऽयं प्रश्न इति प्रेषितशब्दस्यार्थविशेष उपपद्यते । किं यथाप्रसिद्धमेव कार्यकरणसंघातस्य प्रेषयितृत्वम्, किं वा संघातव्यतिरिक्तस्य स्वतन्त्रस्य इच्छामात्रेणैव मनआदिप्रेषयितृत्वम्, इत्यस्यार्थस्य प्रदर्शनार्थं येनेषितं पतति प्रेषितं मन इति विशेषणद्वयमुपपद्यते ।**

**(Samadhana):—** No, this question is from a man of doubts and so, the word 'directed' produces a specific sense. Does the act of directing belong to the aggregate of the body and the senses, as is generally known, or does it belong to something distinct from and independent of the aggregate, which directs

* This stands for the term **Koodastha** used in the Bhashya. This is an important term. Unfortunately the Acharya has not explaincd its meaning here. But this has been explained in the Gita-Bhashya under sukta 3, chapter XII. There in the passage beginning with दृश्यमानगुणम् अन्तर्दोषं वस्तुकूटं, the Acharya said :

"The term **Koodam** is generally used to denote a thing which is good in appearance, but evil inside. So, here it refers to the seed of **samsara (avidya)** and the like which is nothing but evil inside......... He who is seated in **Koodam** as its witness is **Koodastha**".

Also under sukta 16 of chapter XV of the Gita, a similar explanation can be seen.



the mind through mere wish (desire)? For revealing the above sense the two epithets (viz. 'wished' and 'directed') in "Wished by whom is the mind directed" are appropriate.

**ननु स्वतन्त्रं मनः स्वविषये स्वयं पततीति प्रसिद्धम्; तत्र कथं प्रश्न उपपद्यत इति, उच्यते— यदि स्वतन्त्रं मनः प्रवृत्तिनिवृत्तिविषये स्यात्, तर्हि सर्वस्य अनिष्टचिन्तनं न स्यात् । अनर्थं च जानन्सङ्कल्पयति । अभ्यग्रदुःखे च कार्ये वार्यमाणमपि प्रवर्तत एव मनः । तस्माद्युक्त एव केनेषितमित्यादि प्रश्नः ।**

If it is held that it is well-known that the mind is independent, that it falls itself on its objects and that no such question can arise, the reply is that if the mind were independent in the matter of **pravritti** (action) and **nivritti** (renunciation), then none will ever have any thought of evil. Though conscious of the painful result, man indulges in evil. Even when dissuaded, the mind still goes on working in such things as will breed intense grief. Therefore, such a question as 'wished by whom' etc. is quite appropriate.

**केन प्राणः युक्तः नियुक्तः प्रेरितः सन् प्रैति गच्छति स्वव्यापारं प्रति । प्रथम इति प्राणविशेषणं स्यात् तत्पूर्वकत्वात् सर्वेन्द्रियप्रवृत्तीनाम् । केन इषितां वाचम् इमां शब्दलक्षणां वदन्ति लौकिकाः । तथा चक्षुः श्रोत्रं च स्वे स्वे विषये क उ देवः द्योतनवान् युनक्ति नियुङ्क्ते प्रेरयति ॥ १ ॥**

Directed by whom does the vital air go to attend to its own function? The epithet 'first' (foremost) goes with the vital air, for it should precede the activities of all the senses. By whom is wished this speech in the form of sound which the worldly people utter? Similarly, who is the radiant being **(Deva)** that directs the eye and the ear to their respective objects ?(1)

एवं पृष्टवते योग्यायाह गुरुः। शृणु यत् त्वं पृच्छसि, मनआदिकरणजातस्य को देवः स्वविषयं प्रति प्रेरयिता कथं वा प्रेरयतीति।

To the deserving student who has asked thus, the teacher said, "Hear what you have asked for in your question, 'Who is the radiant being that directs the aggregate of the mind and senses with their objects and how does he do it?'"

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वचो ह वाचं स
उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्मा-
ल्लोकादमृता भवन्ति ॥ २ ॥

2. **Because He is the ear of the ear, the mind of the mind, the speech of speech, the vital air of the vital air, and the eye of the eye, the wise, freeing themselves (from the identity with the senses) and renouncing the world, become immortal.**

श्रोत्रस्य श्रोत्रं शृणोत्यनेनेति श्रोत्रम् शब्दस्य श्रवणं प्रति करणं शब्दाभिव्यञ्जकं श्रोत्रमिन्द्रियम् तस्य श्रोत्रं सः यस्त्वया पृष्टः 'चक्षुः श्रोत्रं क उ देवो युनक्ति' इति।

The ear of the ear = that by which one hears is 'ear', meaning it is the instrument of hearing, the hearing organ which enables the audibility of the sound. He is the ear of the ear of whom you have asked for in your question, viz. "Who is the radiant being that unites the eye and the ear (with their objects)?

असावेवंविशिष्टः श्रोत्रादीनि नियुङ्क्त इति वक्तव्ये, नन्वे-तदननुरूपं प्रतिवचनं श्रोत्रस्य श्रोत्रमिति।

**(Purvapaksha):—** Is not the reply viz. "the ear of the ear" inappropriate, when it actually should have been "an entity of such and such attributes directs the ear etc."?



नैष दोषः तस्यान्यथा विशेषानवगमात्। यदि हि श्रोत्रादि-व्यापारव्यतिरिक्तेन स्वव्यापारेण विशिष्टः श्रोत्रादिनियोक्ता अवगम्येत दात्रादिप्रयोक्तृवत्, तदेदमननुरूपं प्रतिवचनं स्यात्। न त्विह श्रोत्रादीनां प्रयोक्ता स्वव्यापारविशिष्टो लवित्रादिवदधि-गम्यते। श्रोत्रादीनामेव तु संहतानां व्यापारेणालोचनसङ्कल्प-व्यवसायलक्षणेन फलावसानलिङ्गेनावगम्यते— अस्ति हि श्रोत्रादि-भिरसंहतः यत्प्रयोजनप्रयुक्तः श्रोत्रादिकलापः गृहादिवदिति। संहतानां परार्थत्वादवगम्यते श्रोत्रादीनां प्रयोक्ता तस्मादनुरूपमेवेदं प्रतिवचनं श्रोत्रस्य श्रोत्रमित्यादि।

**(Samadhana):—** No, there is nothing wrong, for His specific nature is not otherwise known. If the director of the ear etc. is known to have his own activities distinct from directing the ear etc., as in the case of a worker with sickle etc., then the other answer would be inappropriate. But the director of the ear etc. is not known to have his own activities here, as in the case of a worker with sickle. It can be known from the activities such as thinking, willing and determining of the aggregate of the the ear etc. that there should indeed be some one distinct from the aggregate of the ear etc. for whose sake the group of the ear etc. is directed, as in the case of a house (which is for someone's use). Inasmuch as the aggregate (of the ear etc.) is for the sake of another, it goes to show that there should be a director of the ear etc. Therefore the reply such as "the ear of the ear" etc. is quite appropriate.

कः पुनरत्र पदार्थः श्रोत्रस्य श्रोत्रमित्यादेः? न ह्यत्र श्रोत्रस्य श्रोत्रान्तरेणार्थः, यथा प्रकाशस्य प्रकाशान्तरेण।

**(Purvapaksha):—** What then is the sense here in saying "ear of the ear" etc? The ear is in no need of another ear, even as the light is in no need of another light.

नैष दोषः। अयमत्र पदार्थः— श्रोत्रं तावत्स्वविषयव्यञ्जन-समर्थं दृष्टम्। तत्तु स्वविषयव्यञ्जनसामर्थ्यं श्रोत्रस्य चैतन्ये ह्यात्म-

ज्योतिषि नित्येऽसंहते सर्वान्तरे सति भवति, न असति इति अतः श्रोत्रस्य श्रोत्रमित्याद्युपपद्यते। तथा च श्रुत्यन्तराणि–"आत्मनैवायं ज्योतिषास्ते" (बृ. उ. ४/३/६) "तस्य भासा सर्वमिदं विभाति" (क. उ. २/२/१५, श्वे. ६/१४, मु. २/२/१०) "येन सूर्यस्तपति तेजसेद्धः" (तै. ब्रा. ३/१२/९/७) इत्यादीनि। यदादित्यगतं तेजो जगद्भासयतेऽखिलम्" (गीता १५/१२) "क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत" (गीता १३/३३) इति च गीतासु। काठके च "नित्यो नित्यानां चेतनश्चेतनानाम्" (२/२/१३) इति श्रोत्राद्येव सर्वस्यात्मभूतं चेतनमिति प्रसिद्धम्; तदिह निवर्त्यते अस्ति किमपि विद्वद्बुद्धिगम्यं सर्वान्तरतमं कूटस्थमजमजरममृतमभयं श्रोत्रादेरपि श्रोत्रादि तत्सामर्थ्यनिमित्तम् इति प्रतिवचनं शब्दार्थश्चोपपद्यत एव।

**(Samadhana):**— No. This objection is not applicable here. The meaning of the word is this: The ear is seen to be absorbing its object only when the eternal consciousness in all beings, the radiance of the Self standing apart from the aggregate (of the ear etc.), is there, but not otherwise. Therefore the reply "ear of the ear" etc. certainly fits in. So too speak the other srutis:— "By the light of the Self alone he sits" (Brih. Upa. IV, 3-6), "By His light all this shines" (Katha Upa. ii, 2-15, Sveta. Upa. VI-14, Mun ii, 2-10) and "The sun shines kindled by His light" (Tait. Bra. iii, 12-9-7). Also it has been said in the Gita, "The splendour that is in the sun and that illumines the entire world" (XV-12) and "So too the Supreme Self, O Bharata, illumines the entire body" (xiii-33), and in the Katha Upanishad, "Eternal among the ephemeral, conscious among the conscious" (ii, 2-13). The ordinary notion is that the ear etc. constitute the Self of all and that these are conscious. It has been corrected here. There is something which has been realized by the enlightened, which dwells in the heart of all, immutable, unborn, undecaying, immortal and fearless, and which is the ear etc. of even the ear etc., i.e. the source of their power. Thus the reply and the significance of the word are quite reasonable.



तथा मनसः अन्तःकरणस्य मनः। न ह्यन्तःकरणम् अन्तरेण चैतन्यज्योतिषो दीधितिं स्वविषयसङ्कल्पाध्यवसायादिसमर्थं स्यात्। तस्मान्मनसोऽपि मन इति। इह बुद्धिमनसी एकीकृत्य निर्देशो मनस इति।

Similarly, He is the mind of the mind, i.e. of **antahkarana**, for without the light of the consciousness, the **antahkarana** (mind) will not be able to perform its own functions such as thinking and determining. Hence the term, "Mind even of the mind." The intellect and the mind have been regarded as one here and mentioned as mind.

यद्वाचो ह वाचम्; यच्छब्दो यस्मादर्थे श्रोत्रादिभिः सर्वैः सम्बध्यते–यस्माच्छ्रोत्रस्य श्रोत्रम्, यस्मान्मनसो मन इत्येवम्। वाचो ह वाचमिति द्वितीया प्रथमात्वेन विपरिणम्यते, प्राणस्य प्राण इति दर्शनात्। वाचो ह वाचमित्येतदनुरोधेन प्राणस्य प्राणमिति कस्माद् द्वितीयैव न क्रियते! न; बहूनामनुरोधस्य युक्तत्वात्। वाचमित्यस्य वागित्येतावद्वक्तव्यं स उ प्राणस्य प्राण इति शब्दद्वयानुरोधेन; एवं हि बहूनामनुरोधो युक्तः कृतः स्यात्।

The word **yad**, in **yadvacho ha vacham,** is (used) in the sense of 'because'. It applies to the ear and all the rest. It should be meant as, 'Because (He) is the ear of the ear', 'Because (He) is the mind of the mind', etc. The word **vacham** in **vacho ha vacham,** though in the accusative case has to be changed into the nominative case, even as it is said as **pranasya pranah**. Since it has been said as **vacho ha vacham,** why can't it be changed into **pranasya pranam** (instead of **pranah)** in the accusative case in corformity with the above? No, it is not correct, for it is reasonable to go by the majority. Therefore, in conformity with the usage of the two words, **sah** and **pranah** (nominative) in **sah u pranasya pranah,** the word **vacham** (accusative) alone need be changed into **vak** (nominative). Thus indeed the reasonable conformity with the majority is satisfied.

पृष्टं च वस्तु प्रथमयैव निर्देष्टुं युक्तम्। स यस्त्वया पृष्टः प्राणस्य प्राणाख्यवृत्तिविशेषस्य प्राणः तत्कृतं हि प्राणस्य प्राणनसामर्थ्यम्। न ह्यात्मनानधिष्ठितस्य प्राणनमुपपद्यते, "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" (तै. उ. २/७/१) "ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति" (क. उ. २/२/३) इत्यादि श्रुतिभ्यः। इहापि च वक्ष्यते येन प्राण; प्रणीयते तदेव ब्रह्म त्वं विद्धि इति।

It is reasonable to mention the thing asked of in the nominative case. (The drift is,) what has been asked by you is the **prana** of **prana,** i.e. the vital air of what vibrates particularly as vital air. Because of Him indeed the vital air gets the power to vibrate as the vital air. There can indeed be no vibration of the vital air, unless the Self presides over it, even as it is sung in the srutis in such words as, "*If that Bliss lodged in the cavity of the heart is not there, who will, in this world, set **prana** to its task and who **apana**?" (Taitt. Upa. ii, 7-1), and "He leads the **prana** upward and casts the **apana** downward" (Katha. Upa. ii, 2-3). Here (in Kena) too will be taught, "That which none smells with the organ of smell, but the act of smelling takes place because of It, know That alone to be Brahman" (I-8).

श्रोत्रादीन्द्रियप्रस्तावे घ्राणस्यैव ग्रहणं युक्तं न तु प्राणस्य।

**(Purvapaksha):—** As the senses, ear etc., are being mentioned, the apprehension of **ghrana** (smelling) is but reasonable, not of **prana.**

सत्यमेवम्; प्राणग्रहणेनैव तु घ्राणस्य ग्रहणं कृतमेव मन्यते श्रुतिः। सर्वस्यैव करणकलापस्य यदर्थप्रयुक्ता प्रवृत्तिः, तद्ब्रह्मेति प्रकरणार्थो विवक्षितः।

* This interpretation is based on the commentary of the Acharya on mantra 1, Anuvak 7, Valli 2 of Taittiriya Upanishad.



**(Samadhana):—** That is true, but the sruti holds that while the prana is apprehended, **ghrana** too becomes apprehended. That for whose sake is carried out the function of the aggregate of the senses is Brahman. This is the meaning intended in the context.

तथा चक्षुषश्चक्षूरूपप्रकाशकस्य चक्षुषो यद्रूपग्रहणसामर्थ्यं तदात्मचैतन्याधिष्ठितस्यैव। अतः चक्षुषश्चक्षुः।

Similarly, the term 'eye of the eye'. The eye which perceives the form obtains the power to perceive from the consciousness of the Self that presides over it. Hence He is the eye of the eye.

प्रष्टुः पृष्टस्यार्थस्य ज्ञातुमिष्टत्वात् श्रोत्रादेः श्रोत्रादिलक्षणं यथोक्तं ब्रह्म 'ज्ञात्वा' इत्यध्याहियते; अमृता भवन्ति इति फलश्रुतेश्च। ज्ञानाद्ध्यमृतत्वं प्राप्यते। ज्ञात्वा विमुच्यते इति सामर्थ्यात्। श्रोत्राधिकरणकलापमुज्झित्वा— श्रोत्रादौ ह्यात्मभावं कृत्वा, तदुपाधिः सन् तदात्मना जायते म्रियते संसरति च। अतः श्रोत्रादेः श्रोत्रादिलक्षणं ब्रह्मात्मेति विदित्वा; अतिमुच्य श्रोत्राद्यात्मभावं परित्यज्य— ये श्रोत्राद्यात्मभावं परित्यजन्ति, ते धीरा धीमन्तः; न हि विशिष्टधीमत्त्वमन्तरेण श्रोत्राद्यात्मभावः शक्यः परित्यक्तुम् – प्रेत्य व्यावृत्य अस्मात् लोकात् पुत्रमित्रकलत्रबन्धुषु ममाहंभावसंव्यवहारलक्षणात्, त्यक्तसर्वैषणा भूत्वेत्यर्थः अमृता अमरणधर्माणो भवन्ति।

Since a questioner will be anxious to know the replies to his questions, the words "having known" should be supplied so as to mean, "Having known Brahman as the ear etc. of the ear etc., as aforesaid". Also because there is the declaration of the result, "They become immortal", this becomes necessary. Through **jnana** (knowledge) immortality is attained, because there is the teaching that having known (Brahman) one becomes liberated. Thus, having abandoned the aggregate of the senses such as ear etc. — By self-indentification with the senses such

as the ear and thus conditioned by it, man takes birth, dies and gropes in samsara. Therefore realising Brahman to be the Self and the ear of the ear etc. and giving up the self-identification with the ear etc., those who give up identification with the ear etc. become immortal. By any other means than this particular wisdom, never inded is abandonment of self-identification with the ear etc. possible. Having withdrawn oneself from such worldly dealings arising from the notions of 'I' and 'mine' regarding sons, friends, wives and relatives, i.e. having given up all longings they become immortal.

"न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" (कैवल्य. १/२) "पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात् पराङ्पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" (क. उ. २/१/१) "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः··· अत्र ब्रह्म समश्नुते" (क. उ. २/३/१४) इत्यादि श्रुतिभ्यः अथवा, अतिमुच्येत्यनेनैवैषणात्यागस्य सिद्धत्वाद् अस्माल्लोकात् प्रेत्य अस्माच्छरीरादपेत्य मृत्वेत्यर्थः ॥ २ ॥

This is supported by the srutis such as "Not by action, not by progeny, not by wealth, but by renunciation alone immortality is reached" (Kaivalya Upa. i-2), "The self-existent created the senses out-going. Therefore, one sees externally and not the inner Self. Certain intelligent man, with his senses restrained, desirous of immortality, saw the Inner Self" (Katha Upa. ii, 1-1) and "When all the desires clinging to the heart drop away ...... here one attains Brahman" (ibid ii, 3-14). Or since 'giving up longings' is implied in the word **atimuchya** itself, the expression **'asmat lokat pretya'** means "after leaving this body, i.e. after death". (2)

यस्माच्छ्रोत्रादेरपि श्रोत्राद्यात्मभूतं ब्रह्म, अतः—

Because Brahman is the ear etc. even of the ear etc., therefore,



न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादथो अविदितादधि। इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ३ ॥

3. **The eye does not reach there, nor speech, nor mind, nor do we know (Its nature). Therefore we don't know how to impart instruction (about It). Distinct indeed is That from the known and distinct from the unknown. Thus have we heard from the ancients who expounded It to us.**

न तत्र तस्मिन्ब्रह्मणि चक्षुः गच्छति, स्वात्मनि गमनासम्भवात्। तथा न वाग् गच्छति। वाचा हि शब्द उच्चार्यमाणोऽभिधेयं प्रकाशयति यदा, तदाभिधेयं प्रति वाग्गच्छतीत्युच्यते। तस्य च शब्दस्य तन्निर्वर्तकस्य च करणस्यात्मा ब्रह्म। अतो न वाग्गच्छति यथाग्निर्दाहकः प्रकाशकश्चापि सन् न ह्यात्मानं प्रकाशयति दहति वा, तद्वत्।

The eye does not go to that Brahman, for it is impossible to go to oneself. Similarly, speech does not go. When in speech an uttered word goes to reveal its own idea, then speech is said to go to its object. But Brahman is the Self of the word as also of the sense-organ which utters it. Therefore the speech does not go (to Brahman), even as the fire which burns and illumines does not burn or illumine itself.

नो मनः मनश्चान्यस्य सङ्कल्पयितृ अध्यवसायितृ च सत् नात्मानं सङ्कल्पयत्यध्यवस्यति च, तस्यापि ब्रह्मात्मेति। इन्द्रियमनोभ्यां हि वस्तुनो विज्ञानम्। तदगोचरत्वान्न विद्मः तद्ब्रह्म ईदृशमिति।

Nor does the mind go. As for the mind, it thinks of and determines other things, but it does not think of and determine itself, for Brahman is the Self of that even. The cognition of

a thing takes place indeed by (the combined function of) the senses and the mind. Because Brahman is not perceptible to these, we don't know that Brahman is of such and such nature.

अतो न विजानीमो यथा येन प्रकारेण एतद् ब्रह्म अनुशिष्याद् उपदिशेच्छिष्यायेत्यभिप्रायः। यद्धि करणगोचरं तदन्यस्मै उपदेष्टुं शक्यं जातिगुणक्रियाविशेषणैः। न तज्जात्यादिविशेषणवद्ब्रह्म तस्माद्विषमं शिष्यानुपदेशेन प्रत्याययितुमिति उपदेशे तदर्थग्रहणे च यत्नातिशयकर्तव्यतां दर्शयति।

Therefore, we don't know in what manner the disciples should be taught of that Brahman. This is the drift. Anything that is actually perceptible to the senses can be taught to another on terms of species, quality, and action. But Brahman is not possessed of attributes such as species. Therefore it is shown here that, to enlighten the disciples on the subject through instruction, to drive home the idea and make them imbibe the spirit of it, great effort is needed.

'न विद्मो न विजानीमो यथैतदनुशिष्यात्' इति अत्यन्तम् एवोपदेशप्रकारप्रत्याख्याने प्राप्ते तदपवादोऽयमुच्यते। सत्यमेवं प्रत्यक्षादिभिः प्रमाणैर्न परः प्रत्याययितुं शक्यः; आगमेन तु शक्यत एव प्रत्याययितुमिति तदुपदेशार्थमागममाह—

Since an absolute denial has arisen from the instruction, viz "We don't know (Its nature); therefore we don't know how to impart instruction (about It)", an exception to it is now being mentioned. True, it is not possible to convince a person of the Supreme by means of direct evidence, but it is possible to convince one by means of the sastra. Therefore, in order to instruct on this, the evidences of the sastra are being cited.

अन्यदेव तद्विदितादथो अविदितादधीति। अन्यदेव पृथगेव तद् यत्प्रकृतं श्रोत्रादीनां श्रोत्रादीत्युक्तमविषयश्च तेषाम्; तद् विदिताद् अन्यदेव हि। विदितं नाम यद्विदिक्रिययातिशयेनाप्तं



विदिक्रियाकर्मभूतं क्वचित् किञ्चित्कस्यचिद्विदितं स्यादिति। सर्वमेव व्याकृतं विदितमेव; तस्मादन्यदेवेत्यर्थः।

"Distinct indeed is That from the known and distinct from the unknown". That which is the topic of discussion and taught as the ear etc. of the ear etc. and which is not subject to sense-perception is indeed distinct. It is distinct indeed from the known. That which is by all means within the reach of the act of knowing, which is the object of the act of knowing and which someone knows somewhere is said to be known. All that is manifested is indeed 'known'. Therefore, that is all distinct (from Brahman).

अविदितमज्ञातं तर्हीति प्राप्ते आह—अथो अपि अविदिताद् विदितविपरीतादव्याकृताविद्यालक्षणाद्व्याकृतबीजात्, अधि इति उपर्यर्थे, लक्षणया अन्यद् इत्यर्थः। यद्धि यस्मादधि उपरि भवति, तत्तस्मादन्यदिति प्रसिद्धम्।

If it is held that It is then 'unknown', it is said that even from the unknown, from that which is opposed to the known, from the **avyakrita** (unmanifested) possessed of the characteristic of **Avidya** (ignorance) which is the seed of **vyakrita** (manifested), It is different. The word **adhi** means "above", but by indirect significance it becomes "different", as it is well-known that whatever is above another is different from it.

यद्विदितं तदल्पं मर्त्यं दुःखात्मकं चेति हेयम्। तस्माद्विदिता-दन्यद्ब्रह्म इत्युक्ते त्वहेयत्वमुक्तं स्यात्। तथा अविदितादधि इत्युक्तेऽनुपादेयत्वमुक्तं स्यात्। कार्यार्थं हि कारणमन्यदन्येन उपादीयते। अतश्च न वेदितुः अन्यस्मै प्रयोजनायान्यदुपादेयं भवतीति। एवं विदिताविदिताभ्यामन्यदिति हेयोपादेयप्रतिषेधेन स्वात्मनोऽनन्यत्वाद् ब्रह्मविषया जिज्ञासा शिष्यस्य निर्वर्तिता स्यात् न ह्यन्यस्य स्वात्मनो विदिताविदिताभ्याम् अन्यत्वं वस्तुनः संभवतीत्यात्मा ब्रह्मेत्येष वाक्यार्थः; "अयमात्मा ब्रह्म" (माण्डू.)

"य आत्मापहतपाप्मा" (छा. उ. ८/७/१) "यत्साक्षादपरोक्षाद् ब्रह्म" (बृ. उ. ३/४/१) "य आत्मा सर्वान्तरः" (बृ. उ. ३/४/१) इत्यादिश्रुत्यन्तरेभ्यश्चेति ।

Whatever is known is but trifle, mortal and grief-stricken and should therefore be given up. Since Brahman is spoken of as distinct from the known it tantamounts to saying that It is not to be given up. Similarly, when it is said that It is distinct from the unknown it tantamounts to saying that It is not to be acquird. It is for a definite purpose that one obtains from another a thing one is not in possession of. As such, to the knower Self, there is nothing different from It to be acquired to serve a purpose distinct from It. Thus, by the teaching that It is distinct from the known and the unknown, thereby denying both Its rejection or acceptance, the curiosity of the disciple to know a Brahman other than his own Self shall come to an end. Certainly, it is impossible that there should be something distinct from one's own Self which is distinct from both the known and the unknown. Therefore, the meaning of this sentence is that the Self is Brahman. This is supported also by such other srutis as, "This Self is Brahman" (Mand. Upa. 2), "The Self that is not tainted by sin" (Chha. Upa. VIII, 7-1), "The Brahman that is direct and perceptible" (Brih. Upa. iii, 4-1) and "The Self that dwells within all" (ibid).

एवं सर्वात्मनः सर्वविशेषरहितस्य चिन्मात्रज्योतिषो ब्रह्मत्व-प्रतिपादकस्य वाक्यार्थस्य आचार्योपदेशपरम्परया प्राप्तत्वमाह—इति शुश्रुमेत्यादि । ब्रह्म च एवमाचार्योपदेशपरम्परया एवाधिगन्तव्यं न तर्कतः प्रवचनमेधाबहुश्रुततपोयज्ञादिभ्यश्च, इति एवं शुश्रुम श्रुतवन्तो वयं पूर्वेषाम् आचार्याणां वचनम्; ये आचार्या नः अस्मभ्यं ब्रह्म व्याचचक्षिरे व्याख्यातवन्तः विस्पष्टं कथितवन्तः, तेषाम् इत्यर्थः ।

Thus by the teaching, "Thus have we heard from the ancients ....." etc., it is shown that the message which proclaims that the all-embracing Self of the nature of radiance of pure consciousness, devoid of all kinds of attributes, is Brahman, assumed shape through the tradition of Acharyas and their teachings. And Brahman is to be known only through the tradition of teachings of the Acharyas and not through argument, nor by the study of the Vedas, nor by intelligence, great learning, austerity, sacrifice etc. Thus have we heard from the ancients, i.e. thus have we heard the utterance of the ancient teachers who expounded for us all about Brahman very clearly. This is the meaning. (3)



'अन्यदेव तद्विदितादथो अविदितादधि' इत्यनेन वाक्येन आत्मा ब्रह्मेति प्रतिपादिते श्रोतुराशङ्का जाता — कथं न्वात्मा ब्रह्म । आत्मा हि नामाधिकृतः कर्मण्युपासने च संसारी कर्मोपासनं वा साधनमनुष्ठाय ब्रह्मादिदेवान्स्वर्गं वा प्राप्तुमिच्छति । तत्तस्मादन्य उपास्यो विष्णुरीश्वर इन्द्रः प्राणो वा ब्रह्म भवितुमर्हति, न त्वात्मा; लोकप्रत्ययविरोधात् । यथान्ये तार्किका ईश्वरादन्य आत्मा इत्याचक्षते, तथा कर्मिणोऽमुं यजामुं यजेत्यन्या एव देवता उपासते । तस्माद्युक्तं यद्विदितमुपास्यं तद्ब्रह्म भवेत्, ततोऽन्य उपासक इति । तामेतामाशङ्कां शिष्यलिङ्गेनोपलक्ष्य तद्वाक्याद्वा आह — मैवं शङ्किष्ठाः —

When it is expounded that the Self is Brahman, on the basis of the teaching, "Distinct indeed is that from the known and distinct from the unknown", there arises this doubt in the listener:—How can the Self be Brahman ? The Self is a transmigrating entity that is fit to be engaged in action or meditation, and that wishes to attain the gods such as Brahma or heaven through the means such as action and meditation. Therefore, Brahman should be some other worshipful being different from that, e.g. Vishnu, **Isvara**, Indra or **Prana**, but not the Self, for this is opposed to the common belief. Even the other logicians hold that the Self is distinct from the Lord, so also the performers of karma offer worship to other gods saying 'Sacrifice to him', 'Sacrifice to him'. Therefore, in fitness of things

what is known and worshipped should be Brahman, the worshipper being different from It. Having observed this doubt from the behaviour of the disciple or from his words, the teacher said, "Don't entertain any such doubt."

यद्वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।। ४ ।।

4. **That which is not uttered by speech, that by which the word is expressed, know That alone to be Brahman, and not this (non-Brahman) which is being worshipped.**

यत् चैतन्यमात्रसत्ताकम्, वाचा वागिति जिह्वामूलादिष्वष्टसु स्थानेषु विषक्तमाग्नेयं वर्णानाम् अभिव्यञ्जकं करणम्, वर्णाश्चार्थसङ्केतपरिच्छिन्ना एतावन्त एवं क्रमप्रयुक्ता इति; एवं तदभिव्यङ्ग्यः शब्दः पदं वागिति उच्यते; 'अकारो वै सर्वा वाक्सैषा स्पर्शान्तःस्थोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" (ऐ. आ. २/३/७१/३) इति श्रुतेः। मितममितं स्वरः सत्यानृते एष विकारो यस्यास्तया वाचा पदत्वेन परिच्छिन्नया करणगुणवत्या – अनभ्युदितम् अप्रकाशितमनभ्युक्तम् ।

That which consists of the essence of pure Consciousness cannot be uttered by spech which, located at *eight points such as the root of the tongue and presided over by the god of Fire, serves as the organ to express the letters. The letters too, confine themselves to the implied meaning, certain number and **sequence. The sound thus expressed by them is called **pada** (word) or **vak** (speech). The sruti says, **"Akara** (i.e. letter A)

* These eight points are the root of the tongue, chest, throat, head, teeth, nose, lips and palates.

** The followers of Mimamsa system of philosophy hold that the two letters in the word गौः (**gau**=cow) viz. ग (ga) and औ (**au**) with a **visarga** (symbol in writing with two dots like :) are for ever fixed as their sequence to convey the meaning cow.



verily is all ***speech and the speech, manifesting itself with its variations such as [1]**sparsas** (स्पर्शाः), [2]**antasthas** (अन्तस्थाः) and [3]**ushma** (ऊष्म), becomes many with various forms" (Aita. Ara. ii, 3-7-13). By speech which has modifications such as **mitam** (मितं) regulated, or metrical — Rik), **amitam** (अमितं) non-regulated or prose -- Yajus), **svarah** (स्वरः musical -- Sama), **satya** (सत्य true) and **anrita** (अनृत untrue), and which confines itself to words and by the organ which produces speech, Brahman cannot be expressed, i.e. spoken of.

येन ब्रह्मणा विवक्षितेऽर्थे सकरणा वाग् अभ्युद्यते चैतन्यज्योतिषा प्रकाशते प्रयुज्यत इत्येतद्यद्वाचो ह वागित्युक्तम्, "वदन्वाक्" (बृ. उ. १/४/७) "यो वाचमन्तरो यमयति" (बृ. उ. ३/७/१७) इत्यादि च वाजसनेयके। "या वाक् पुरुषेषु सा घोषेषु प्रतिष्ठिता कश्चित्तां वेद ब्राह्मणः" इति प्रश्नमुत्पाद्य प्रतिवचनमुक्तम् "सा वाग्यया स्वप्ने भाषते" इति सा हि वक्तुर्वक्तिर्नित्या वाक् चैतन्यज्योतिःस्वरूपा "न हि वक्तुर्वक्तेर्विपरिलोपो विद्यते" (बृ. उ. ४/३/२६) इति श्रुतेः।

Brahman on account of which **vak** (speech) together with its organ is expressed with the meaning intended, that is to say, uttered or engaged, by the light of Consciousness, which is spoken of as 'speech of speech' (Kena Upa. 1-2) and as, 'As It speaks (It is called) the organ of speech' (Brih. Upa. 1, 4-7) and 'He who restrains and governs it dwelling within' etc. in the Vajasaneyaka (i.e. Brih. Upa. iii, 7-17), and of which it is said thus, 'The speech in men is established in sounds. Does any Brahmana

*** An exhaustive explanation of Pranava or Omkara by the same author finds a place on pages 386 to 390 of "Gita in Sankara's Own Words", vol i (consisting of chapters IV to VIII). There the significance of the letter 'A' has been clearly explained.

1 Consonants of any of the five classes of letters from क् (K) to म् (M). (कादयोमान्ताः स्पर्शाः — All those letters from ka, kha, ga and ending with ba, bha, ma are called sparsas).

2 य (ya), र (ra), ल (la), and व (va)

3 श (sa), ष (sha), स (sa), ह (ha)

know it ?' Raising this question the answer has been given in such words as, 'That (power) by which one speaks in dream is speech'. That speech indeed constitutes the speaker's power to speak. It is eternal and of the nature of the light of Consciousness, as evidenced by the sruti passage, 'For the speaker's power of speaking is never lost '(Brih Upa. IV, 3-26).

तदेव आत्मस्वरूपं ब्रह्म निरतिशयं भूमाख्यं बृहत्त्वाद् ब्रह्मेति विद्धि विजानीहि त्वम्। यैर्वागाद्युपाधिभिर्वाचो ह वाक् चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो मनः कर्ता भोक्ता विज्ञाता नियन्ता प्रशासिता विज्ञानमानन्दं ब्रह्म इत्येवमादयः संव्यवहारा असंव्यवहारे निर्विशेषे परे साम्ये ब्रह्मणि प्रवर्तन्ते, तान्व्युदस्य आत्मानमेव निर्विशेषं ब्रह्म विद्धीति एवशब्दार्थः नेदं ब्रह्म यदिदम् इत्युपाधिभेदविशिष्टमनात्मेश्वरादि उपासते ध्यायन्ति। तदेव ब्रह्म त्वं विद्धि इत्युक्तेऽपि नेदं ब्रह्म इत्यनात्मनोऽब्रह्मत्वं पुनरुच्यते नियमार्थम् अन्यब्रह्मबुद्धिपरिसंख्यानार्थं वा ॥ ४ ॥

Know that Self alone in Its real nature to be Brahman unsurpassed, called Bhuma (great). Being **brihat** (big) It is known as Brahman. Because It is conditioned by speech etc., such functional attributes as the speech of speech, the eye of the eye, the ear of the ear, the mind of mind, the doer, the enjoyer, the knower, the controller and the instructor, Knowledge and Bliss are applied to Brahman devoid of functional activities and attributes, supreme and equal (in all). Know the Self freed from these conditions to be Brahman devoid of attributes. This is the sense implied in the word **eva** (alone) in the above mantra. That which is represented by the word **idam** (this) and which consists of the non-Self, **Isvara** etc. that are distinguished as being conditioned by adjuncts and meditated on, is not Brahman. 'Know That alone to be Brahman'. In this utterance itself it has been shown that the non-Self is not Brahman. Still this idea is repeated in the words, 'This is not Brahman', in order to make it a specific rule or to exclude the notion of Brahman in what is non-Brahman. (4)



यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥

5. **That which one does not think with the mind, that by which, they say, the mind is thought, know That alone to be Brahman and not this (non-Brahman) which is being worshipped.**

यन्मनसा न मनुते; मन इत्यन्तःकरणं बुद्धिमनसोरेकत्वेन गृह्यते। मनुतेऽनेनेति मनः सर्वकरणसाधारणम्, सर्वविषयव्यापकत्वात्। "कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" (बृ. उ. १/५/३) इति श्रुतेः कामादिवृत्तिमन्मनः। तेन मनसा यत् चैतन्यज्योतिर्मनसः अवभासकं न मनुते न सङ्कल्पयति नापि निश्चिनोति लोकः, मनसोऽवभासकत्वेन नियन्तृत्वात् सर्वविषयं प्रति प्रत्यगेवेति स्वात्मनि न प्रवर्ततेऽन्तःकरणम्। अन्तःस्थेन हि चैतन्यज्योतिषावभासितस्य मनसो मननसामर्थ्यम्; तेन सवृत्तिकं मनो येन ब्रह्मणा मतं विषयीकृतं व्याप्तम् आहुः कथयन्ति ब्रह्मविदः। तस्मात् तदेव मनस आत्मानं प्रत्यक्चेतयितारं ब्रह्म विद्धि। नेदमित्यादि पूर्ववत् ॥ ५ ॥

That which one does not think with the mind: Here mind and intellect are considered as one instrument — the **antahkarana**. That by which one thinks is mind. Since it pervades all sensory-objects, it is common to all organs. According to the srutis such as, "Desire, determination, doubt, faith, indifference, steadiness, unsteadiness, shame, intelligence, and fear — all these are the mind alone", (Brih. Upa. 1, 5-3), mind is of such functions as desire etc. By that mind the light of the Consciousness, which illumines the mind, is not thought or determined, for being the illuminator of the mind, It governs the mind. The Self is the In-dweller of all things (including the mind). Hence the **antahkarana** (the mind) cannot act on its own Self. The